"दशमूलीं स्वयङ्गुप्तां शङ्खपुष्पीं शठीं बलाम् ।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान् ॥
भार्गीं पुष्करमूलञ्च द्विपलांशयवाढ़कम् ।
हरीतकीशतञ्चैकं जलपञ्चाढ़के पचेत् ॥
यवे स्विन्ने कषायन्तम्पूतन्तञ्चाभयाशतम् ।
पचेत् गुड़तुलां दत्त्वा कुड़वञ्च पृथग् घृतात् ॥
तैलात् सपिप्पलीचूर्णात् सिद्धशीते च माक्षिकात् ॥
लिह्याद्द्वे चाभये नित्यमतः खादेद्रसायनात् ॥
तद्वलीपलितं हन्ति वर्णायुर्बलवर्द्धनम् ।
पञ्चकासान् क्षयं कासं हिक्कां सविषमज्वराम् ॥
हन्यात्तथार्शोग्रहणीहृद्रोगारुचिपीनसान् ।
अगस्त्यविहितं श्रेष्ठं रसायनमिदं शुभम्" ॥
इत्यगस्त्यहरीतकी ॥ * ॥
"शिरसः सदने स्रावे नासाया हृदि ताम्यति ।
कासप्रतिश्यायरसे धूमं वैद्यः प्रयोजयेत् ॥
दशाङ्गुलोन्मितां नाड़ीं अथवाष्टाङ्गुलोन्मिताम् ।
शरावसंपुटच्छिद्रे कृत्वाध्यक्षां विचक्षणः ॥
वैरेचनं मुखेनैव कासवान् धूममापिबेत् ।
तमुरः केवलं प्राप्तं मुखेनैवोद्वमेत् पुनः ॥
सद्यस्य तैक्ष्ण्याद्विक्षिप्य श्लेष्माणमुरसि स्थितम् ।
निष्कृष्य शमयेत् कासं वातश्लेष्मसमुद्भवम्" ॥
"मनःशिलालमधुकमांसीमुस्तेङ्गुदैः पिबेत् ।
धूमं तस्यानु च क्षीरं सुखोष्णं सगुड़ं पिबेत् ॥
एष कासान् पृथग्दोषसन्निपातोद्भवान् जयेत् ।
प्रसह्य पर्य्यसंसिद्धानन्यैर्योगशतैरपि" ॥
"मनःशिलैलामरिचक्षाराञ्जनकुटन्नटैः ।
वंशलोचनशैवालक्षौमनक्तकरोहिषैः ॥
पूर्व्वकल्पेन धूमोऽयं सानुपानो विधीयते ।
त्वालं मनःशिला तद्वत् पिप्पलीनागरैः सह ॥
त्वगिङ्गुदीवृहत्यौ द्वे तालमूलं मनःशिला ।
कार्पासास्थ्यश्वगन्धा च धूमः कासविनाशनः" ॥
"पैत्तिके स कफे कासे वमनं सर्पिषा हितम् ।
तथा मदनकाश्मर्य्यमधूककथितैर्ज्जलैः ॥
यष्ट्याह्वफलकल्कैर्व्वा विदारीक्षुरसायुतैः ।
हृतदोषस्ततः शीतं मधुरञ्च क्रमं भजेत् ॥
पैत्ते तनुकफे कासे त्रिवृतां मधुरैर्युताम् ।
दद्याद्घनकफे तिक्तैर्विरेकार्थं युतां भिषक् ॥
"शर्कराचन्दनद्राक्षा मधुधात्रीफलोत्पलैः ।
पैत्तेसमुस्तमरिचः सकफे सघृतोऽनिले ॥
मृद्वीकार्द्धशतं त्रिंशत् पिप्पलीशर्करापलम् ।
लेहयेन्मधुना गोर्व्वा क्षीरपस्य शकृद्रसम्" ॥
"बलिनं वमनैरादौ शोधयेत् कफकासिनम् ।
यवान्नैः कटुरुक्षोष्णैः कफघ्नैश्चाप्युपाचरेत् ॥
पिप्पलीक्षारिकैर्यूषैः कौलत्थं मूलकस्य च ।
लघून्यन्नानि भुञ्जीत रसैर्व्वा कटुकान्वितैः" ॥
कासमर्द्दाश्वबिट्भृङ्गराजोवार्त्ताकुजारसाः ।
सक्षौद्राः कफकासघ्नाः सुररसासितस्य च" ॥
"क्षतकासाभिभूतानां वृत्तिः स्यात् पित्तकासिकी ।
क्षीरसर्पिर्मधुप्राया संसर्गे तु विशेषणम् ॥
वातपित्तार्द्दितेऽभ्यङ्गो गात्रभेदे घृतैर्हितः ।
तैलैर्मारुतरोगघ्नैः पीड्यमाने च वायुना ॥
हृत्पार्श्वार्त्तिषु पानं स्याज्जीवनीयस्य सर्पिषः ।
सदाहं कासिनो रक्तं ष्ठीवतः सबलेऽनिले ।
मांसोचितेभ्यः कामेभ्यो लावादीनां रसा हिताः" ॥
"निवृत्ते क्षतदोषे तु कफे वृद्ध उरः शिरः ।
दाल्यते कासिनो यस्य सधूमान्नापिबेदिमान् ॥
द्वे मेदे मधुकं द्वे च बलेतैः क्षौमनक्तकैः ।
वर्त्तितैर्धूममापीय जीवनीयघृतं पिबेत्" ॥
"सम्पूर्णरूपं क्षयजं दुर्ब्बलस्य विवर्ज्जयेत् ।
नवोत्थितं बलवतः प्रत्याख्यायाचरेत् क्रियाम्" ॥
"पित्ते कफे च संक्षीणे परिक्षीणेषु धातुषु ।
घृतं कर्क्कटकीक्षीरद्विबलासाधितं पिबेत्" ॥
"क्षतकासे च ये धूमाः सानुपाना निदर्शिताः ।
क्षतकासेऽपि तानेव यथावस्थं प्रयोजयेत्" ॥
"सन्निपातभवोऽप्येष क्षयकासः सुदारुणः ।
सन्निपातहितं तस्मात् सदा कार्य्यं भिषग्जितम् ॥
दोषानुबलयोगाच्च हरेद्रोगबलाबलम् ।
कासेष्वेषु गरीयांसं जानीयादुत्तरोत्तरम्" ॥

इति चिकित्सास्थाने २२ अध्याये चरकेणोक्तम् ॥ * ॥

कासस्य निदानसम्प्राप्तिलक्षणसहितं प्राग्रूपं चिकित्सितञ्च यथा,—

"उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः ।
कासस्यापि च ते ज्ञेयास्तत्र वोत्पत्तिहेतवः" ॥
"स वातपित्तप्रभवः कफाच्च
क्षतात्तथान्यः क्षयजोऽपरश्च ।
पञ्चप्रकारः कथितो भिषग्भि-
र्विवर्द्धितो यक्ष्मविकारकृत्स्यात् ॥
भविष्यतस्तस्य तु कण्ठकण्डू-
र्भोज्योपरोधो गलतालुलेपः ।
स्वशब्दवैषम्यमरोचकोऽग्नि-
सादश्च लिङ्गानि भवन्त्यमूनि" ॥
"वृद्धत्वमासाद्य भवत्ययो वै
याप्यन्तमाहुर्भिषजस्तु कासम् ॥
शृङ्गीवचा कट्फलकत्तृणाब्द-
धान्याभयाभार्ग्यमराह्वविश्वम् ।
उष्णाम्बुना हिङ्गुयुतं तु पीत्वा-
बद्धास्यमप्याशु जहाति कासम् ॥
फलत्रिकव्योषविड़ङ्गशृङ्गी
रास्नावचापद्मकदेवकाष्ठैः ।
लेहः समैः क्षौद्रसिताघृताक्तः
कासं निहन्यादचिरादुदीर्णम् ॥
पथ्यां सितामामलकानि लाजां
समागधीश्चापि विचूर्ण्य शुण्ठीम् ।
सर्पिर्मधुभ्यां विलिहीतकासी
स सैन्धवां वोष्णजलेन कृष्णाम् ॥
खादेद्गुड़ं नागरपिप्पलीभ्यां
द्राक्षाञ्च सर्पिर्मधुनावलिह्यात् ।
द्राक्षां सिता मागधिकाञ्च तुल्याम्
सशृङ्गवेरं मधकन्तुगाश्च ॥
लिह्याद्घृतक्षौद्रयुतां समांसां
सितोपलां वा मरिचांशयुक्ताम् ।
धात्रीकणाबिल्वसितोपलाश्च
सचूर्ण्य मण्डेन पिबेच्च दध्ना ॥
हरेणुकां मागधिकाञ्च तुल्याम्
दध्ना पिबेत् कासगदाभिभूतः" ॥
"पिबेच्च सीधुं मरिचान्वितं वा
तेनाशु कासं शमम्भ्युपैति ।
द्राक्षाम्बुमञ्जिष्ठपुराङ्कथाभिः
क्षीरं शृतं माक्षिकसंप्रयुक्तम् ॥
निदिग्धिकानागरपिप्पलीभिः
खादेच्च मुद्गान् मधुना सुसिद्धान् ।
उत्कारिकां सर्पिषि नागराढ्याम्
पक्त्वा समूलैस्त्रुटिकोलपत्रैः ॥
एभिर्निषेवेत कृताञ्च पेयाम्
तन्वीं सुशीतां मधुना विमिश्राम् ।
यत्स्नेहि सर्पिर्विहितं षड़ङ्गम्
तद्वातकासं जयति प्रसह्य ॥
विदारिगन्धादिकृतं घृतं वा
रसेन वा वासकजेन पक्वम् ।
विरेचनं स्नैहिकमत्र चोक्त-
मास्थापनञ्चाप्यनुवासनञ्च ॥
धूमं पिबेत् स्नैहिकमप्रमत्तः
पिबेत् सुखोष्णं घृतमेव चात्र ।
हिता यवागवश्च रसेषु सिद्धाः
पयांसि लेहाः स घृतास्तथैव ॥
प्रच्छर्द्दनं कायशिरो विरेका
स्तथैवधूमाकवलग्रहाश्च ।
उष्णाश्च लेहाः कटुकानि हन्युः
कफं विशेषेण विशोषणं वा" ॥
"खर्ज्जूरभार्गीमगधाप्रियाल-
मधूलिकैलामलकैः समांशैः ।
चूर्णं सिताक्षौद्रघृतप्रगाढ़-
न्दीन् हन्ति कासानुपयुज्यमानः" ॥
"प्रस्थत्रयेणामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुड़स्य ।
चूर्णीकृतैर्ग्रन्थिकचव्यजीर-
व्योषेभकृष्णा ह्वपुषाजमोदैः ।
विड़ङ्गसिन्धुत्रिफलायमानी
पाठाग्निधान्यैश्च पिचुप्रमाणैः ॥
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेद्यथावत् ।
तम्भक्षयेदक्षफलप्रमाणम्
यथेष्टचेष्टं त्रिसुगन्धि युक्तम् ॥
अनेन सर्व्वे ग्रहणी विकाराः
स श्वासकासस्वरभेदशोषाः ।
शाम्यन्ति चायं चिरमन्तरमे-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ॥
स्त्रीणाञ्च बन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रतीतः" ॥
इति कल्याणको गुड़ः ॥ * ॥
"कुलीर शृङ्गी चटकैणलावा-
न्निःक्वाथ्य वर्गैर्मधुरैस्तथान्यैः ॥
पचेद्घृतं तत्तु निषेव्यमानम्
हन्यात् क्षतोत्थं क्षयजञ्च काशम्' ॥

इति सुश्रुते उत्तरतन्त्रे । ५२ अध्याये ॥ * ॥